# Shri Ramakrishna Stutih

# श्रीरामकृष्णस्तुतिः

## Document Information

Text title : Shri Ramakrishna Stutih

File name : rAmakRRiShNastutiH2.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Yatindra Vimala Chaturdhurina

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णस्तुतिः

त्रेतायां रामभद्राय जगद्रमणकारिणे
द्वापरे कृष्णरूपाय पापतापादिकर्षिणे ॥ १॥

कलौ श्री रामकृष्णाय युग्मरूपप्रधारिणे ।
नमः कोटियुगव्यापीतपःफलस्वरूपिणे ॥ २॥

अवतीर्ण परेशाय यतीन्द्रस्य नमोऽस्तु ते ।
युगयुगावताराणां समष्टये नमोऽस्तु ते ॥ ३॥

रामो दूर्वादलश्यामः कृष्णोऽपि कृष्णवर्णकः ।
माता ते कालिका घोरा गौरस्त्वं शिवरूपकः ॥ ४॥

निष्कलुषं जगत्सर्वं निष्पापं चिरशुभ्रकम् ।
कृतं त्वया स्थिरज्योतिः प्रमूर्तब्रह्मवर्चसम् ॥ ५॥

विश्वदीप स्वरूपाय भक्तिमुक्तिप्रदायिने ।
नमस्ते रामकृष्णाय नरेन्द्रध्यानरूपिणे ॥ ६॥

वामनस्य स्थिरा प्रज्ञा रामस्य सत्यनिष्ठता ।
वीर्यं नीतिश्च कृष्णस्य त्वय्येव पूर्णतां गता ॥ ७॥

गौरस्य प्रीतिभक्ति च ज्ञानकर्म समन्विते ।
त्वयि रूपं परं प्राप्ते रामकृष्ण नमोऽस्तु ते ॥ ८॥

सर्वधर्मप्रपालिने तत्समन्वय कारिणे ।
नमस्ते रामकृष्णाय सच्चिदानन्दरूपिणे ॥ ९॥

"तावान् पन्था मतं यावन्" -महावाणीप्रचारिणे ।
परशिवस्वरूपाय "जीवशिव" -विघोषिणे ॥ १०॥

माध्यमेन महादेव्या जननीशारदामणेः ।
नारीशक्तेः प्रबोधाय संसारारण्यवासिने ॥ ११॥

ईशप्रत्यक्षतायाश्च साक्षात्प्रमाणकारिणे ।
नमो भगवते तुभ्यं षडैश्वर्य प्रकाशिने ॥ १२॥

पुत्राधमयतीन्द्राय पादरेणु प्रदायिने ।
नमस्ते रामकृष्णाय शारदासाररूपिणे ॥ १३॥

इति डॉटर श्रीयतीन्द्रविमलचौधरिणाविरचिता
"श्रीश्रीरामकृष्णस्तुतिः" समाप्ता ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Stutih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*